# वैदिक वाङ्गमय नीतिशास्त्रस्य परिशीलनम्

**डॉ. ममता कुमारी**

केयं नीतिः? तच्छास्त्रं किमिति जिज्ञासायां तद् बोधक प्रमाणं गवेषणायां मनीषिणः कृतयत्नाः भवन्ति। नीतिरिति नयनम्। वैदिक वाङ्मये पुंसामानयनं वैदिक आचार संहितायाः शासनान्तर्गते, तदस्ति वैशिष्टयं वैदिकवाङ्मयस्य। वेदेषु भवा वैदिकी। लोकेषु भवा च लौकिकी। च एव वैदिकास्त एव लौकिका इति वैदिकी वाङ्.मयी नीतिरिति। प्रतिशाख्यग्रन्थस्य वचनमिदम्। तत्र चान्विष्यते मानवानां धर्मः। न भवति स्वार्थ–नोदिता बुद्धिर्गवेषकाणाम्। ते चिन्तकाः व्यापकनयेन विचारयन्ति। तेषां धियो धारककर्मशक्तयश्च सर्वजनहित–साधिकाः भवन्ति। एतादृशेषु प्रेक्षावत्सु जनेषु भगवतः प्रकाशो भवति।